तस्य एकादश्यां पापाश्रयत्वं भक्षणे दोषश्च यथा,—
“एकादश्यामागतायां पावयन्त्यां जगत्त्रयम्।
स्थातव्यमन्नमाश्रित्य भवता पापपूरुष !॥
अन्नमाश्रित्य तिष्ठन्तं भवन्तं पापपूरुषम्।
न हनिष्यति सन्मूर्त्तिरियमेकादशी तिथिः॥
तस्मादन्नं न भोक्तव्यं कदाचिदपि सत्तमैः।
आत्मनो हितमिच्छद्भिः संप्राप्ते हरिवासरे॥
संसारे यानि पापानि तान्येवैकादशीदिने।
अन्नमाश्रित्य तिष्ठन्ति पुण्डरीकेक्षणाज्ञया॥
कुर्व्वतां सर्व्वपापानि नरकान्निष्कृतिर्भवेत्।
न निष्कृतिर्भवेन्नूनमन्नं भुञ्जतां हरिवासरे॥
मर्त्या भक्तानि यावन्ति भुञ्जते हरिवासरे।
प्रतिभक्ते ब्रह्महत्याकोटिजं पातकं लभेत्॥
सर्व्वपापाश्रयं भक्तं त्यक्तव्यं हरिवासरे।
मोहाद्ये भुञ्जते वापि ते ज्ञेयाः पापिनां वराः॥”
इति पाद्मे क्रियायोगसारे २१ अध्यायः॥
वर्ज्जनीयान्नं यथा,—
“नाद्यात् शूद्रस्य विप्रोऽन्नं मोहाद्वा यदि-वान्यतः।
स शूद्रयोनिं व्रजति यस्तु भुङ्क्ते ह्यनापदि॥
षण्मासान् यो द्विजो भुङ्क्ते शूद्रस्यान्नं विगर्हितम्।
जीवन्नेव भवेत् शूद्रो मृतः श्वा चाभिजायते॥
ब्राह्मणक्षत्त्रियविशां शूद्रस्य च मुनीश्वराः।
यस्यान्नेनोदरस्थेन मृतस्तद्योनिमाप्नुयात्॥
राजान्नं नर्त्तकान्नञ्च तक्ष्णोऽन्नञ्चक्रकारिणः।
गणान्नं गणिकान्नञ्च षण्डान्नञ्चैव वर्ज्जयेत्॥
चक्रोपजीविरजकतस्करध्वजिनां तथा।
गान्धर्व्वलोहकारान्नं सूतकान्नं विवर्ज्जयेत्॥
कुलालचित्रकर्म्मान्नं वार्द्धुषेः पतितस्य च।
पौनर्भवच्छात्रिकयोरभिशस्तस्य चैव हि॥
सुवर्णकारशैलूषव्याधितस्यातुरस्य च।
चिकित्सकस्य चैवान्नं पुंश्चल्या दाण्डिकस्य च॥
स्तेननास्तिकयोरन्नं देवतानिन्दकस्य च।
सोमविक्रयिणश्चान्नं श्वपाकस्य विशेषतः॥
भार्य्याजितस्य चैवान्नं यस्य चोपपतिर्गृहे।
उत्सृष्टस्य कदर्य्यस्य तथैवोच्छिष्टभोजनः॥
अपङ्क्त्यन्नञ्च सङ्घान्नं शस्त्राजीवस्य चैव हि।
क्लीवस्यान्यासिनश्चान्नं मत्तोन्मत्तस्य चैव हि॥
भीतस्य रुदितस्यान्नं अवक्रुष्टं परिक्षुतम्।
ब्रह्मद्विषः पापरुचेः श्राद्धान्नं सूतकस्य च॥
वृथापाकस्य चैवान्नं शवान्नं श्वशुरस्य च।
अप्रजानान्तु नारीणां भृतकस्य तथैव हि॥
कन्दुकान्नं विशेषेण शस्त्रविक्रयिणस्तथा।
शौण्डान्नं नालिकान्नञ्च भिषजामन्नमेव च।
विद्धप्रजननस्यान्नं परिवित्त्रन्नमेव च॥
पुनर्भुवो विशेषेण तथैव दिधिषूपतेः।
अवज्ञातञ्चावधूतं सरोषं विस्मयान्वितम्।
गुरोरपि न भोक्तव्यमन्नं सत्कारवर्ज्जितम्॥
दुष्कृतं हि मनुष्यस्य सर्व्वमन्ने व्यवस्थितम्।
यो यस्यान्नेन जीवेत स तस्याश्नाति किल्विषम्॥”
“आभीरः कुलमित्रञ्च गोपालो दासनापितौ।
एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत्॥
कुशीलवः कुम्भकारः क्षेत्रकर्म्मक एव च।
एते शूद्रेषु भोज्यान्ना दत्त्वा स्वल्पं पणं बुधैः॥”
इति कौर्म्मे उपविभागे १६ अध्यायः॥
तस्य मुख्यत्वं पारिभाषिकत्वञ्च यथा,—
“तण्डुलोऽम्बुग्निसंयोगाल्लवणयोगेन पिष्टकम्।
फलं त्रितयसंयोगादन्नं भवति तत्क्षणात्॥”
इति रामार्च्चनचन्द्रिकाधृतवचनमिति केचित्॥
(धनम्। यथा, मनौ। ११। ७।
“यस्य त्रैवार्षिकं भक्तं पर्य्याप्तं भृत्यवृत्तये।
अधिकं वापि विद्येत स सोमं पातुमर्हति॥”
“भक्तं धनम्।” इति तद्भाष्ये मेधातिथिः।)
भक्तः, त्रि, (भजते स्मेति। भजसेवायां + क्तः।) तत्परः। इति हेमचन्द्रः॥ (यथा, महाभारते। १। १७३। १४।
“न त्वां दृष्ट्वा पुनरन्यां द्रष्टुं कल्याणि! रोचये।
प्रसीद वशगोऽहन्ते भक्तं मां भज भाविनि!॥”
पूज्यविषयकानुरागो भक्तिस्तद्वांश्च।) अथ श्रीभगवद्भक्तलक्षणानि। लिङ्गपुराणे।
“व्रतकर्म्मगुणज्ञानभोगजन्मादिमत्स्वपि।
शैवेष्वपि च कृष्णस्य भक्ताः सन्ति तथा तथा॥
श्रीभागवते एकादशस्कन्धे। उत्तमभक्ता यथा,
“ज्ञात्वाज्ञात्वाथ ये वै मां यावान् यश्चास्मि यादृशः।
भजन्त्यनेन भावेन ते मे भक्ततमा मताः॥”
मध्यमभक्तो यथा,—
“ईश्वरे तदधीने वा बालिशेषु द्विषत्सु च।
प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः॥”
प्राकृतभक्तो यथा,—
“अर्च्चायामेव हरये पूजां यः श्रद्धयेहते।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः॥”
इति श्रीहरिभक्तिविलासः॥
अपि च।
“भक्तानां लक्षणं ब्रूहि भक्तानुग्रहकातर!।
येषां स्पर्शनसन्दर्शात् सद्यः पूतो नराधमः॥
हरिभक्तिविहीनाश्च महाहङ्कारसंयुताः।
स्वप्रशंसारता धूर्त्ताः शठाश्च साधुनिन्दकाः॥
पुनन्ति सर्व्वतीर्थानि येषां स्नानावगाहनात्।
येषाञ्च पादरजसा पूता पादोदकान्मही॥
येषां सन्दर्शनं स्पर्शं देवा वाञ्छन्ति भारते।
सर्व्वेषां परमो लाभो वैष्णवानां समागमः॥
न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः।
ते पुनन्त्युरुकालेन विष्णुभक्ताः क्षणाद्धो!॥
सौतिरुवाच।
महालक्ष्मीवचः श्रुत्वा लक्ष्मीकान्तश्च सस्मितः।
निगूढतत्त्वं कथितुमुपचक्रमे॥
श्रीनारायण उवाच।
भक्तानां लक्षणं लक्ष्मि! गूढं श्रुतिपुराणयोः।
पुण्यस्वरूपं पापघ्नं सुखदं भक्तिमुक्तिदम्।
सारभूतं गोपनीयं न वक्तव्यं खलेषु च॥
गुरुवक्त्राद्विष्णुमन्त्रो यस्य कर्णे प्रविश्यति।
वेदान्तवेदवेदाङ्गास्तं पवित्रं वदन्ति हि॥
पुरुषाणां शतं पूर्व्वं पूतं तज्जन्ममात्रतः।
स्वर्गस्थं नरकस्थं वा मुक्तिमाप्नोति तत्क्षणात्॥
यैः कैश्चिद्यत्र वा जन्म लब्धं येषु च जन्तुषु।
जीवन्मुक्तास्ते च पूता यान्ति काले हरेः पदम्॥
मद्भक्तियुक्तो मत्पूजानियुक्तो मद्गुणान्वितः।
मद्गुणश्लाघनीयश्च मन्निविष्टश्च सन्ततम्॥
सगद्गदः साश्रुनेत्रः स्वात्मविस्मृत एव च।
न वाञ्छन्ति सुखं मुक्तिं सालोक्यादिचतुष्टयीम्॥
ब्रह्मत्वममरत्वं वा तद्वाञ्छा मम सेवने।
इन्द्रत्वञ्च मनुत्वञ्च देवत्वञ्च सुदुर्लभम्॥
स्वर्गराज्यादिभोगञ्च स्वप्ने च नहि वाञ्छंति।
ब्रह्माण्डानि विनश्यन्ति देवा ब्रह्मादयस्तथा।
कल्याणभक्तियुक्तश्च मद्भक्तो न प्रणश्यति।
भ्रमन्ति भारते भक्ता लब्ध्वा जन्म सुदुर्लभम्॥
तेऽपि यान्ति मद्दौं पूत्वा नवं तीर्थ ममालयम्॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५ अध्यायः॥
अपि च।
“रतिः कृष्णकथायाञ्च यस्याश्रुपुलकोद्गमः।
मनो निमग्नं यस्यैव स भक्तः कथितो बुधैः॥
पुत्त्रदारादिकं सर्व्वं जानाति श्रीहरेरपि।
आत्मना मनसा वाचा स भक्तः कथितो बुधैः॥
दयास्ति सर्व्वभूतेषु सर्व्वं कृष्णमयं जगत्।
यो जानाति महाज्ञानी स भक्तो वैष्णवोत्तमः॥
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १ अध्यायः॥
भगवद्भक्ता यथा, तत्रैव ३ अध्याये।
मद्भक्ताश्चैव निःशङ्काः कर्म्मनिर्म्मूलकारकाः।
नाहं शक्तश्च भक्तानां संहारे नित्यदेहिनाम्॥
भक्ता ममानुगा नित्यं मत्पादार्च्चनतत्पराः।
अहं भक्तान्तिके नित्यं तेषां रक्षणहेतवे॥
सर्व्वे नश्यन्ति ब्रह्माण्डे प्रभवन्ति पुनः पुनः।
न मे भक्ताः प्रणश्यन्ति निःशङ्काश्च निरापदः॥
हरिभक्तिमाहात्म्यं यथा,—
द्विजानां हरिभक्तानां प्रभावो दुर्लभः श्रुतौ।
येषां पादाब्जरजसा सद्यः पूता वसुन्धरा॥
तेषाञ्च पादचिह्नं यत्तीर्थं तत् परिकीर्त्तितम्।
तेषाञ्च स्पर्शमात्रेण तीर्थपापं प्रणश्यति॥
आलिङ्गनात् सदालापात्तेषामुच्छिष्टभोजनात्।
दर्शनात् स्पर्शनाच्चैव सर्व्वपापात् प्रमुच्यते॥
भ्रमणे सर्व्वतीर्थानां यत् पुण्यं स्नानतो भवेत्।
हरिदासस्य विप्रस्य तत् पुण्यं दर्शनाल्लभेत्॥
इति तत्रैव २१ अध्यायः॥
त्रिविधभक्तलक्षणं यथा,—
भक्तानां त्रिविधानाञ्च लक्षणं श्रूयतामिति।
त्वन्नामश्रवणरतो भक्तो मन्नामगुणकीर्त्तिषु॥
मनो निवेशयेत्त्यक्त्वा संसारसुखकारणम्।
दास्यं विना न हीच्छन्ति सालोक्यादिचतुष्टयम्॥
नैव निर्व्वाणमुक्तिञ्च सुधापानसमीप्सितम्।
ध्यायते मत्पदाब्जञ्च पूजयेद्भक्तिभावतः॥
श्रीहेतुः किं तस्य देवः सङ्कल्परहितस्य च।
सर्व्वसिद्धिं न वाञ्छन्ति तेऽणिमादिकमीप्सितम्॥